**Listen to this chant at [svastha.net/peace-chants](svastha.net/peace-chants)**

bhūḥ prapȧdye̱ bhuvaḥ̱ prapȧdye̱ svȧḥ
prapȧdye̱ bhūrbhūva̱ssvȧḥ prapȧdye̱ brahma̱
prapȧdye brahmako̱śaṁ prapȧdye̱'mṛtaṁ̱
prapȧdye'mṛtako̱śaṁ prapȧdye caturjā̱laṁ
brȧhmako̱śaṁ yaṁ mṛ̱tyurnāva̱paśyȧti̱ taṁ
prapȧdye de̱vānprapȧdye devapu̱raṁ prapȧdye̱
parī̍vṛto̱ varī̍vṛto̱ brahmȧṇā̱ varmȧṇā̱'haṁ
tejȧsā̱ kaśyȧpasya̱ yasmai̱ nama̱stacchiro̱
dharmȯ mū̱rdhānȧṁ bra̱hmottȧrā̱
hanu̇rya̱jño'dhȧrā̱ viṣṇu̱rhṛdȧyam̐ saṁvathsa̱raḥ
pra̱janȧnama̱śvinau̇ pūrva̱pādā̍va̱trirmadhyȧṁ
mi̱trāvaru̇ṇāvapara̱pādā̍va̱gniḥ pucchȧsya
pratha̱mamaṁ kāṇḍaṁ̱ tata̱ indra̱statȧḥ
pra̱jāpȧti̱rabhȧyaṁ catu̱rtham̐ sa vā e̱ṣa di̱vyaḥ
śā̎kva̱raḥ śiśu̇māra̱stam̐ ha̱ ya e̱vaṁ vedāpȧ
punarmṛ̱tyuṁ jȧyati̱ jayȧti sva̱rgaṁ lo̱kaṁ
nādhvani̱ pramī̍yate̱ nāgnau pramī̍yate̱ nāpsu

Listen to this chant at [svastha.net/peace-chants](svastha.net/peace-chants)

pramī̍yate̱ nāna̱patya̍ḥ pramī̱yate̍ la̱ghvānno̍

bhavati dhru̱vastvama̍si dhru̱vasya kṣi̍tamasi̱

tvaṁ bhū̱tānā̱madhi̍patirasi̱ tvaṁ bhū̱tānā̱m̐

śreṣṭho̍'si̱ tvāṁ bhū̱tānyupa̍pa̱ryāva̍rtante̱

nama̍ste̱ nama̱ssarva̍ṁ te̱ namo̱

nama̍śśiśukumārāya̱ nama̍ḥ ||

nama̱ḥ prācyai̍ di̱śe yāśca̍ de̱vatā̍ e̱tasyā̱ṁ

prati̍vasantye̱tābhya̍śca̱ namo̱ namo dakṣi̍ṇāyai

di̱śe yāśca̍ de̱vatā̍ e̱tasyā̱ṁ

prati̍vasantye̱tābhya̍śca̱ namo̱ nama̱ḥ pratī̎cyai

di̱śe yāśca̍ de̱vatā̍ e̱tasyā̱ṁ

prati̍vasantye̱tābhya̍śca̱ namo̱ nama̱ udī̎cyai

di̱śe yāśca̍ de̱vatā̍ e̱tasyā̱ṁ

prati̍vasantye̱tābhya̍śca̱ namo̱ nama̍ ū̱rdhvāyai

di̱śe yāśca̍ de̱vatā̍ e̱tasyā̱ṁ

prati̍vasantye̱tābhya̍śca̱ namo̱ namo'dha̍rāyai

di̱śe yāśca̍ de̱vatā̍ e̱tasyā̱ṁ

**Listen to this chant at [svastha.net/peace-chants](svastha.net/peace-chants)**

prati̍vasantye̱tābhya̍śca̱ namo̱ namo̍'vānta̱rāyai̍
di̱śe yāśca̍ de̱vatā̍ e̱tasyāṁ̱
prati̍vasantye̱tābhya̍śca̱ namo̱ namo
gaṅgāyamunayormadhye ye̍ vasa̱nti̱ te me
prasannātmānaściraṁ jīvitaṁ va̍rdhaya̱nti̱
namo gaṅgāyamunayormuni̍bhyaśca̱ namo̱
namo gaṅgāyamunayormuni̍bhyaśca̱ namaḥ ||
om śānti̱ḥ śānti̱ḥ śānti̍ḥ ||

**Listen to this chant at svastha.net/peace-chants**

भूः प्रप॑द्ये॒ भुवः॒ प्रप॑द्ये॒ स्वः॑ प्रप॑द्ये॒ भूर्भूव॒स्स्वः॑ प्रप॑द्ये॒

ब्रह्म॒ प्रप॑द्ये ब्रह्मको॒शं प्रप॑द्ये॒ऽमृतं॒ प्रप॑द्येऽमृतको॒शं

प्रप॑द्ये चतुर्जा॒लं ब्र॑ह्मको॒शं यं मृ॒त्युर्नाव॒पश्य॑ति॒ तं

प्रप॑द्ये दे॒वान्प्रप॑द्ये देवपु॒रं प्रप॑द्ये॒ परी॑वृतो॒ वरी॑वृतो॒

ब्रह्म॑णा॒ वर्म॑णा॒ऽहं तेज॑सा॒ कश्य॑पस्य॒ यस्मै॒

नम॒स्तच्छिरो॒ धर्मो॑ मू॒र्धानं॑ ब्र॒ह्मोत्त॑रा॒ हनु॑र्य॒ज्ञोऽध॑रा॒

विष्णु॒र्हृ॒द॑यꣳ संवथ्स॒रः प्र॒जन॑नम॒श्विनौ॑

पूर्व॒पादा॑व॒त्रिर्मध्यं॑ मि॒त्रावरु॑णावप॒रपादा॑व॒ग्निः

पुच्छ॑स्य प्रथ॒मं काण्डं॒ तत॒ इन्द्र॒स्ततः॑ प्र॒जाप॑ति॒रभ॑यं

चतु॒र्थꣳ स वा ए॒ष दि॒व्यः शाक्व॒रः शिशु॑मार॒स्तꣳ ह॒

य ए॒वं वेदाप॑ पुनर्मृ॒त्युं जय॑ति॒ जय॑ति स्व॒र्गं लो॒कं

**Listen to this chant at [svastha.net/peace-chants](svastha.net/peace-chants)**

नाध्वनि॒ प्रमी॑यते॒ नाग्नौ प्रमी॑यते॒ नाप्सु प्रमी॑यते॒

नान॒पत्यः॑ प्रमी॒यते॑ ल॒घ्वान्नो॑ भवति ध्रु॒वस्त्वम॑सि

ध्रु॒वस्य क्षि॑तमसि॒ त्वं भू॒ताना॒मधि॑पतिरसि॒ त्वं

भू॒ताना॒ꣳ॒ श्रेष्ठो॑ऽसि॒ त्वां भू॒तान्युप॑प॒र्याव॑र्तन्ते॒ नम॑स्ते॒

नम॒स्सर्वं॑ ते॒ नमो॒ नम॑श्शिशुकुमाराय॒ नमः॑॥

नम॒ः प्राच्यै॑ दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॑

प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नमो दक्षि॑णायै दि॒शे याश्च॑

दे॒वता॑ ए॒तस्यां॑ प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नम॒ः

प्रतीच्यै दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॑

प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नम॒ उदीच्यै दि॒शे याश्च॑

svastha
yoga • ayurveda

**Listen to this chant at [svastha.net/peace-chants](svastha.net/peace-chants)**

दे॒वता॑ ए॒तस्या॑ं प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नम॑

ऊ॒र्ध्वायै॑ दि॒शे याश्च॑ दे॒वता॑ ए॒तस्या॑ं

प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नमोऽध॑रायै दि॒शे याश्च॑

दे॒वता॑ ए॒तस्या॑ं प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒

नमो॑ऽवान्त॒रायै॑ दि॒शे याश्च॑ दे॒वता॑ ए॒तस्या॑ं

प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒ नमो गङ्गायमुनयोर्मध्ये ये॑

वस॒न्ति॒ ते मे प्रसन्नात्मानश्चिरं जीवितं व॑र्धय॒न्ति॒

नमो गङ्गायमुनयोर्मुनि॑भ्यश्च॒ नमो॒ नमो

गङ्गायमुनयोर्मुनि॑भ्यश्च॒ नमः ॥

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥